नौनिहाल गौतम

Arts and Humanities UGC Care List Sr. No.-251 ISSN : 2347-9892

# शोधप्रज्ञा

## अर्द्धवार्षिकी मूल्याङ्कि‍ता शोधपत्रिका

## Biannual Refereed Research Journal

(UGC Approved)

वर्ष सप्तमम्    अङ्कः प्रथमः    जुलाई–दिसम्बर २०१९

प्रधानसम्पादकः

प्रो0देवीप्रसादत्रिपाठी

कुलपतिः

उत्तराखण्डसंस्कृतविश्वविद्यालयः

हरिद्वारम्, उत्तराखण्डम्



Scanned with CamScanner

## अनुक्रमणिका


| क्रम.सं. | विषय | नाम | पृष्ठ सं. |
|---|---|---|---|
| 1. | श्रीमद्भागवतमहापुराणे प्रयुक्तच्छन्दसां निदर्शनम् | डॉ शैलेशकुमारतिवारी | 1 |
| 2. | समासोक्त्यादौ वाच्यस्यैव प्राधान्यं न तु व्यङ्ग्यस्य | डॉ.हरीशचन्द्रतिवाड़ी | 7 |
| 3. | काव्यादर्शदिशा रूपकालङ्कारस्वरूपनिरूपणम् | डॉ0 कंचनतिवारी | 11 |
| 4. | शिक्षाया: सामाजिकाधार: | डॉ. सुमनप्रसादभट्ट: | 16 |
| 5. | भविष्याय संस्कृतस्य विश्वोपकारत्वसामर्थ्यम् | डॉ. प्रकाशचन्द्रपन्त: | 24 |
| 6. | ऋग्वेदे जलचिकित्साविज्ञानम् | डॉ. वेदव्रत: | 31 |
| 7. | संस्कृतपत्रिका-स्वामी विवेकानन्द: | डॉ. सुनीता वर्मन | 37 |
| 8. | रामायणे रघूणां तु साध्यं लोकानुरञ्नम् | डॉ. नौनिहालगौतम: | 43 |
| 9. | वैदिकदेवतादर्शनम् | अमितभार्गव: | 52 |
| 10. | वैयाकरणीमीमांसकनैयायिकमते शाब्दबोधे मुख्यविशेष्यतत्त्वविचार: | नितेशकुमारद्विवेदी | 57 |
| 11. | व्याकरणशास्त्रं तस्य दर्शनत्वञ्च | सृष्टि आर्या | 65 |
| 12. | नाट्यशास्त्रे वास्तुविधानम् | डॉ. अनिलकुमार: | 71 |
| 13. | वैदिकवाङ्मये अश्वमेधयागस्य स्वरूपविमर्श: | सुधाकरकुमारपाण्डेय: | 78 |
| 14. | होराशास्त्रसम्मतभाग्योदयस्य काल: | डॉ. सुरेशशर्मा | 85 |
| 15. | नाटकलक्षणरत्नकोशसम्मतं नाटकलक्षणम् | डॉ. रामरत्नखण्डेलवाल: | 96 |
| 16. | अनुपमा ह्युपनिषत् | डॉ. दीपककुमारकोठारी | 102 |
| 17. | ओषधीनामुपादेयता | श्रीमती लेखपतिदेवी | 109 |
| 18. | समासान्ताधिकारस्य तत्र प्रयुक्तप्रत्ययानाञ्च निवेशनप्रकार: | डॉ. अरविन्दमहापात्र: | 114 |
| 19. | प्राणायाम रहस्य | डॉ. रत्नलाल | 120 |
| 20. | काव्य में ध्वनि प्रयोग का विकास | डॉ. मनोजं किशोर पन्त | 125 |
| 21. | वेदोदित आयुर्वेदीय दृष्टि | डॉ. अरुण कुमार मिश्र | 131 |




Scanned with CamScanner

# रामायणे रघूणां तु साध्यं लोकानुरञ्नम्

डॉ. नौनिहालगौतमः*

"प्रजाश्चैवानुरञ्जय" (वाल्मीकिरामायणम्)

रामायणं महर्षिवाल्मीकिप्रणीतमादिकाव्यम्। काव्यमिदं मानवानां पथप्रदर्शकमस्ति। महाकाव्येऽस्मिन् इक्ष्वाकूणां राज्ञां चरितानि निबद्धानि सन्ति। तेषां राज्ञां गुणाः लोके आदर्शभूताः सन्ति। तेषां राज्ञामसीमितेषु गुणेषु महत्त्वपूर्णः गुणः अस्ति- लोकानुरञ्जनम्। वस्तुतः इक्ष्वाकूणां महीक्षितां साध्यं कर्म भवति स्म- लोकानुरञ्जनम्। तेषां राज्ञां गुणोऽयं साम्प्रतमपि प्रासंगिकतां भजते। एतस्यैव निरूपणमत्राभीष्टमस्ति।

इक्ष्वाकुवंशपरम्परा- इक्ष्वाकुवंशस्य विद्यते सुदीर्घा परम्परा। रामायणे या वंशपरम्परा निरूपिता सैवात्र सङ्क्षेपेण प्रस्तूयते। रामायणे इक्ष्वाकुवंशस्य दैवीयोत्पत्तिः वर्णिताऽस्ति। सर्वप्रथमं ब्रह्मा जातः। ब्रह्मणः मरीचिः, मरीचेः कश्यपः, कश्यपात् विवस्वान्, वैवस्वतः मनुः, मनोः सुतः इक्ष्वाकुः अभवत्। इक्ष्वाकुः अयोध्यायाः प्रथमः राजा आसीत्। ततः अस्मिन् वंशे कुक्षिः, विकुक्षिः, बाणः, अनरण्यः, पृथुः, त्रिशङ्कुः, धुन्धुमारः, युवनाश्वः, मान्धाता, सुसन्धिः, सुसन्धेः ध्रुवसन्धिः प्रसेनजित् च, ध्रुवसन्धेः भरतः, भरतात् असितः, असितात् सगरः, सगरात् असमञ्जः, असमञ्जात् अंशुमान्, अंशुमतः दिलीपः, दिलीपस्य भगीरथः, भगीरथात् ककुत्स्थः, ककुत्स्थात् रघुः, रघोः कल्माषपादः सौदासः वा, कल्माषपादात् शङ्खणः, शङ्खणात् सुदर्शनः, सुदर्शनस्य अग्निवर्णः, अग्निवर्णस्य शीघ्रगः, शीघ्रगस्य मरुः,मरोः प्रशुश्रुवः, प्रशुश्रुवस्य अम्बरीषः, अम्बरीषस्य नहुषः, नहुषस्य नाभागः, नाभागस्य अजः सुव्रतः च, अजस्य दशरथः, दशरथस्य रामः भरतः लक्ष्मणः शत्रुघ्नश्च।1

एते इक्ष्वाकवो राजानः धर्मपराः प्रजापालननिरताश्चासन्। किमधिकं एतेषां साध्यं भवति स्म- प्रजानुरञ्जनम्। प्रजासु विनयाधानात्, प्रजानां रक्षणात् भरणात् च, प्रजाभ्यः पिता इव सुखप्रदानेन च राजा प्रजानुरञ्जको भवति। महाकविकालिदासः दिलीपस्य गुणान् वर्णयन् एवं कथयति-

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।



Scanned with CamScanner